नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **28**

No. of Printed Pages – **12**

# S-71- Sanskritam (T.L.) (Supp.)

## तृतीय भाषा – संस्कृतम्

## माध्यमिक पूरक परीक्षा, 2020

**समय : 3¼ (सपादहोरात्रयम्)**

**अधिकतमांका : 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. अधोलिखितस्य पठितगद्यांशस्य हिन्दीभाषया अनुवादं लिखत : **5**

मल्लेषु मल्लः सूरजमल्लः शरीरसौष्ठवस्य, सौन्दर्यस्य, सरलतायाः, चारित्रिकदृढतायाः, धार्मिकतायाः, वीरतायाः, करुणायाः, त्यागस्य, बलिदानस्य, शरणागतरक्षणस्य, प्रजावात्सल्यस्य, राष्ट्रवादस्य, सर्वपन्थसमादरस्य च साक्षात् प्रतिमूर्तिरासीत् । सूरजमल्लः स्वकालखण्डस्य अत्यन्तं दुर्घर्षः, अतिशयेन तेजस्वी, नितान्तं नीतिनिपुणः, अद्वितीयश्च योद्धा आसीत् ।

**अथवा**

गङ्गदत्त आह – 'भद्र ! कृतं त्वया मित्रकृत्यं, तत्साम्प्रतमनेनैव घटिकायन्त्रमार्गेण गम्यताम्' इति । सर्प आह – "भो गङ्गदत्त, न सम्यगभिहितं त्वया । कथमहं तत्र गच्छामि ? मदीयं बिलदुर्गमन्येन रुद्धं भविष्यति । तस्मादत्रस्थस्य मे मण्डूकमेकैकं, स्ववर्गीयं प्रयच्छ । नो चेत् सर्वानपि भक्षयिष्यामि ।" इति ।

2. अधोलिखितस्य पठितपद्यस्य हिन्दीभाषाया अनुवादं लिखत : **5**

गायन्ति देवाः किल गीतकानि,
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गाप वर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ।।

**अथवा**

अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ।।

3. अधोलिखितस्य पठितपद्यांशस्य संस्कृतेन व्याख्यां कुरुत : **4**

न जातु दुःखं गणनीयम्

न च निजसौख्यं मननीयम् ।

कार्यक्षेत्रे त्वरणीयम्

लोकहितं मम करणीयम् ।।

**अथवा**

अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः ।

अहिंसा परमं सत्यं, यतो धर्मः प्रवर्तते ।।

4. अधोलिखितस्य नाट्यांशस्य संस्कृतेन व्याख्या कार्या : **3**

राजा – (सहर्षम् आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि ? (इति बालं परिष्वजते)

बालः – मुञ्च माम् । यावन्मातुः सकाशं गमिष्यामि ।

राजा – पुत्रक मया सहैव मातरमभिनन्दिष्यसि ।

बालः – मम खलु तातो दुष्यन्तः । न त्वम् ।

राजा – (सस्मितम्) एष विवाद एव प्रत्याययति ।

**अथवा**

भिल्लाः – हा अस्माकम् अपि जीवनेन को लाभः ? यदि वयं देशरक्षायै न किम् अपि कर्तुं समर्थाः, तदा मरणम् एव अस्माकं श्रेयस्करम् ।

प्रतापः – हा धिक् ! भवन्तः सर्वे इदं किं कुर्वन्ति ? आत्महननं महत्पापं वर्तते । स्थीयतां स्थीयताम् । कष्टानि सोढ्वा वीरगत्या मरणं कल्याणकरं कथ्यते । इत्थम् आत्महननं तु नपुंसकानां कर्म । किञ्चिद् धैर्येण विचारयन्तु ।

5. अधोलिखितेषु अष्टसु **षण्णां** प्रश्नानाम् उत्तराणि संस्कृतेन लिखत : **6 × ½ = 3**

(i) सुर–मुनि–वन्दित–चरणा का अस्ति ?

(ii) सर्वथा अविचारितं किं न कर्त्तव्यम् ?

(iii) जयन्तः कस्य सुतः आसीत् ?

(iv) महाराणाप्रतापस्य राज्याभिषेकः कुत्र अभवत् ?

(v) केषु अनर्थाः बहुलीभवन्ति ?

(vi) 'भारत–वैभवम्' इति पाठस्य रचनाकारः कः अस्ति ?

(vii) देवाः कैः प्रसन्नाः भवन्ति ?

(viii) कानि कर्माणि सेवितव्यानि ?

**निर्देश** : प्रश्नसंख्या **6 – 9** पर्यन्तं रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत –

6. वायसः व्याधम् अपश्यत् । **1**

7. जन्मभूमिः स्वर्गादपि गरीयसी । **1**

8. बालकस्य सर्वदमनः नाम आसीत् । **1**

9. बाल्यकाले केशवानन्दः पशुचारकः आसीत् । **1**

10. प्रश्नपत्रमतिरिच्य स्वपाठ्यपुस्तकात् द्वौ श्लोकौ लिखत । **2 × 1½ = 3**

11. अधोलिखितं गद्यांशं पठित्वा एतदाधारित–प्रश्नानाम् उत्तराणि लिखत –

संसारे एकतायाः अतीवावश्यकता वर्तते । विशेषतः कलियुगेऽस्मिन् संहतिः कार्यसाधिका । यतो हि वर्तमाने काले यादृशं सामाजिकं राष्ट्रियं च जीवनमस्ति, तस्य निर्माणाय रक्षणाय च संगठनं परमावश्यकम् । अद्यत्वे संसारे यस्मिन् राष्ट्रे एकतायाः अभावोऽस्ति, तत् राष्ट्रं सद्य एव परतन्त्रतापाशबद्धं भवति । अस्माकं देशस्य पारतन्त्र्यम् अनया एव एकतया सहयोगेन वा विच्छिन्नं जातम् । महात्मना गान्धिमहोदयेन तथैवान्यैश्च देशभक्तैः भारतीयसमाजे सर्वत्र एकत्वभावनोदयेन पराधीनतापाशस्य छेदनं विहितम् । अधुना लोकतन्त्रात्मकमस्माकं राष्ट्रं संघटनबलेनैव स्वोन्नतिं विदधाति । अत एवोच्यते – "संघे शक्तिः कलौ युगे" ।

(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **1**

(ख) यथानिर्देशं प्रश्नानामुत्तराणि लिखत ।

(i) संसारे कस्याः अतीवावश्यकता वर्तते ? **1**

(ii) अस्मिन् कलियुगे का कार्यसाधिका अस्ति ? **1**

(iii) संघे शक्तिः कस्मिन् युगे भवति ? **1**

(iv) सामाजिकजीवनस्य निर्माणाय रक्षणाय च किं परमावश्यकम् ? **1**

(v) अस्माकं राष्ट्रं कीदृशम् अस्ति ? **1**

(ग) यथानिर्देशं प्रश्नानामुत्तराणि लिखत ।

(i) "राष्ट्रं संघटनबलेनैव स्वोन्नतिं विदधाति" । अत्र कर्तृपदं किम् ? लिखत । **1**

(ii) "तत् राष्ट्रं सद्य एव परतन्त्रतापाशबद्धं भवति ।" अत्र सर्वनामपदं किम् ? लिखत । **1**

(iii) "लोकतन्त्रात्मकं राष्ट्रं संघटनबलेनैव स्वोन्नतिं विदधाति ।" अत्र विशेषणपदं किम् ? 1

(iv) "महात्मना गान्धिमहोदयेन पराधीनतापाशस्य छेदनं विहितम् ।" अत्र विशेष्यपदं किम् अस्ति ? 1

12. अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत :

(i) अजरामरवत् 1

(ii) भारतं नाम 1

13. अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखत :

(i) खलु + अयम् 1

(ii) विष्णुः + त्राता 1

14. अधोलिखितरेखाङ्कितपदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत :

(i) <u>माता च पिता च</u> वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति । 1

(ii) <u>वीरपुरुषः</u> युद्धं करोति । 1

(iii) सः <u>उपकृष्णं</u> वसति । 1

15. अधोलिखितरेखाङ्कितपदेषु विभक्तिं तत् कारणञ्च लिखत –

(i) जनकः पुत्रेण सह गच्छति । 1

(ii) कामात् क्रोधः जायते । 1

(iii) जयदेवः संस्कृते चतुरः अस्ति । 1

16. कोष्ठके प्रदत्तप्रकृतिप्रत्ययाभ्यां पदं निर्माय वाक्यं पूरयत –

(i) अस्य मृत्तिकामयूरस्य ________ पश्य । (रम्य + त्व) 1

(ii) विद्यालयस्य वार्षिकोत्सवे ________ नृत्यति । (कुमार + ङीप्) 1

17. अधोलिखितवाक्ययोः रेखाङ्कितपदयोः प्रकृतिप्रत्ययौ पृथक् कृत्वा लिखत –

(i) भोगभवने न रमणीयम् । 1

(ii) पन्थानम् अनुसरन् जीवनस्य एकोननवतितमे वर्षे अनन्तयात्रायै प्रस्थितः । 1

18. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत ।

| |
|---|
| तत्र, नूनम्, यदा, च, |

(i) नानादिग्देशादागत्य रात्रौ पक्षिणः ________ निवसन्ति । 1

(ii) ________ सूर्योदयो भवति, सः पाठं पठति । 1

(iii) ________ त्वया गन्तव्यम् । 1

अधोलिखितवाक्यानां वाच्यपरिवर्तनं कुरुत ।

19. अहं पठामि । **1**

20. छात्रः विद्यालयं गच्छति । **1**

21. तेन हस्यते । **1**

22. घटिकाचित्रसहायतया संस्कृतेन शब्दैः रिक्तस्थाने समयलेखनं कुरुत –

(क) 


(ख) 


(i) निशा प्रातः _______ विद्यालयं गच्छति । **1**

(ii) अहं प्रतिदिनं _______ शयनत्यागं करोमि । **1**

23. अधोलिखितानि वाक्यानि शुद्धानि कुरुत –

(i) ते मम मित्राणि अस्ति । **1**

(ii) भवान् कुत्र गच्छामि ? **1**

(iii) जनकं नमः । **1**

24. भवान् राजकीयमाध्यमिक विद्यालय विज्ञाननगरस्य दशम्याः कक्षायाः मनीषः अस्ति । स्व विद्यालयस्य प्रधानाध्यापकाय शिक्षणशुल्कमुक्त्यर्थं प्रार्थनापत्रं लिखतु । **8 × ½ = 4**

**अथवा**

त्वं स्वकीयं मित्रं स्वयात्राविषये अधोलिखितपत्र–मञ्जूषासहायतया रिक्तस्थानानि पूरयित्वा लिखत –

| |
|---|
| दर्शनयात्रा, तत्र, भ्रमणार्थं, अहं, भ्रमणं, अनुजेभ्यः, अग्रजेभ्यः, जनवरी |

जयनगरम्

20 फरवरी, 2020

प्रियमित्र ! आशीष !

अत्र कुशलं (i) _______ अस्तु । विगत (ii) _______ मासे अहं (iii) _______ अहमदाबादनगरं गतवान् । तत्र कांकरिया तडागः, साबरमती आश्रमः, भद्रकालीमन्दिरं, जलाराममन्दिरम् इत्यादि दर्शनीयस्थलानां (iv) _______ मया कृतम् । तत्र (v) _______ अक्षरधाम इति मन्दिरमपि अपश्यम् । तदपि भृशं मनोहारि । (vi) _______ अतीव रमणीया जाता । (vii) _______ प्रणामाः । (viii) स्नेहाशिषाः ।

भवन्मित्रम्

मनीषः

25. मञ्जूषायाः उचितपदैः 'क्रीडा' इति विषये संवादं पूरयत – 8 × ½ = 4

| |
|---|
| अङ्कपत्रम्, भवान्, किमर्थं किन्तु, अध्ययनेन, प्रथमं, चिन्तां, उत्तीर्णः |

माता – पुत्र ! भवान् एवं सदा क्रीडति चेत् (i) _______ न भविष्यति ।

अमरः – मात ! (ii) _______ तथा वदति ? अहं क्रीडनानन्तरं पठिष्यामि ।

माता – गृहसदस्याः वदन्ति यत् (iii) ________ सर्वदा क्रीडति ।

अमरः – अहं क्रीडामि (iv) ________ पठामि अपि । चिन्ता मास्तु ।

माता – वत्स ! एतत् (v) ________ भवतः एव वा ?

अमरः – सत्यम् अम्ब ! कक्षायाम् अहमेव (vi) ________ स्थानं प्राप्तवान् ।

माता – अस्तु भवान् क्रीडतु । अहं (vii) ________ न करिष्यामि ।

अमरः – शिक्षकः वदति–जीवने (viii) ________ सह क्रीडा अपि आवश्यकी ।

26. अधोलिखितेषु षड्सु वाक्येषु केषाञ्चन **चतुर्णां** वाक्यानां संस्कृतेन अनुवादं कुरुत – 4 × 1 = 4

(i) तुम चित्र देखोगे ।

(ii) दुर्जन को धिक्कार ।

(iii) वह बकरी को गाँव ले जाता है ।

(iv) विद्या विनय से शोभित होती है ।

(v) विवाद मत करो ।

(vi) सदा सत्य बोलो ।

27. अधः प्रदन्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन षड्वाक्यानि निर्माय लिखत –

**6 × ½ = 3**

| |
|---|
| मेलापकाः, पुष्करतीर्थमेलापकः, ब्रह्ममन्दिरम्, सरोवरः, स्नानम्, आपणाः |



**अथवा**

मञ्जूषायां प्रदत्तशब्दानां सहायतया रिक्तस्थानानि पूरयित्वा अनुच्छेदं लिखत ।

| |
|---|
| अहो, अतीवशुद्धं, प्रवहति, दृश्यम्, सूर्यस्य, पुष्पाणि |

(i) ________ प्रातःकालम् ।

(ii) अतीवरमणीयं ________ ।

(iii) प्रातःकाले वातावरणं ________ भवति ।

(iv) सर्वत्र शीतलवायुः ________ ।

(v) ________ प्रकाशः सर्वत्र प्रसरति ।

(vi) उद्याने ________ विकसन्ति ।

28. अधोलिखितवाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजनं कृत्वा लिखत । **6 × ½ = 3**

(i) जनाः जागरूकाः अभवन् ।

(ii) आंग्लसैनिकैः मानगढपर्वतः परितः समाक्रान्तः ।

(iii) गोविन्दगुरुः 'सम्पसभा' इति संस्थायाः स्थापनां कृतवान् ।

(iv) प्रतिवर्षम् एतस्याः अधिवेशनं भवेत् इति निश्चितम् ।

(v) मानगढपर्वतोपरि सम्पसभायाः प्रथमम् अधिवेशनम् अभवत् ।

(vi) आंग्लशासकाः रुष्टाः अभवन् ।